# गणपत्यथर्वशीर्षोपनिषत्

ganạpatyatharvaśīrṣopaniṣat

(९) ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाग्ँसस्तनूभिः । व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥

ॐ शान्तिः शान्तिः शान्तिः

Om bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ | bhadraṁ paśyemākṣabhiryajatrāḥ | sthirairaṅgaistuṣṭuvāg m̐ sastanūbhiḥ | vyaśema devahitaṁ yadāyuḥ | svasti na indro vṛddhaśravāḥ | svasti naḥ pūṣā viśvavedāḥ | svasti nastārkṣyo ariṣṭanemiḥ | svasti no bṛhaspatirdadhātu ||

Om śāntiḥ śāntiḥ śāntiḥ

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्ताऽसि। त्वमेव केवलं धर्ताऽसि। त्वमेव केवलं हर्ताऽसि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्माऽसि नित्यम्॥ १॥

Om namaste gaṇapataye | tvameva pratyakṣaṁ tattvamasi | tvameva kevalaṁ kartā'si | tvameva kevalaṁ dhartā'si | tvameva kevalaṁ hartā'si| tvameva sarvaṁ khalvidaṁ brahmāsi | tvaṁ sākṣādātmā'si nityam || 1 ||

ऋतं वच्मि। सत्यं वच्मि॥ २॥

ṛtaṁ vacmi | satyaṁ vacmi || 2||

अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात् ॥ ३॥

ava tvaṁ mām | ava vaktāram| ava śrotāram| ava dātāram| ava dhātāram| avānūcānamava śiṣyam | ava paścāttāt | ava purastāt| avottarāttāt| ava dakṣiṇāttāt| ava cordhvāttāt| avādharāttāt| sarvato māṁ pāhi pāhi samantāt || 3||

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाऽद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ ४॥

tvaṁ vāṅmayastvaṁ cinmayaḥ| tvamānandamayastvaṁ brahmamayaḥ | tvaṁ saccidānandā'dvitīyo'si| tvaṁ pratyakṣaṁ brahmāsi| tvaṁ jñānamayo vijñānamayo'si || 4 ||

सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्पदानि ॥ ५॥

sarvaṁ jagadidaṁ tvatto jāyate| sarvaṁ jagadidaṁ tvattastiṣṭhati| sarvaṁ jagadidaṁ tvayi layameṣyati| sarvaṁ jagadidaṁ tvayi pratyeti| tvaṁ bhūmirāpo'nalo'nilo nabhaḥ| tvaṁ catvāri vākpadāni || 5 ||

त्वं गुणत्रयातीतः। त्वं अवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः।त्वं मूलाधारस्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ६ ॥

tvaṁ guṇatrayātītaḥ । tvam avasthātrayātītaḥ। tvaṁ dehatrayātītaḥ । tvaṁ kālatrayātītaḥ। tvaṁ mūlādhārasthito'si nityam। tvaṁ śaktitrayātmakaḥ। tvāṁ yogino dhyāyanti nityam। tvaṁ brahmā tvaṁ viṣṇustvaṁ rudrastvamindrastvamagnistvaṁ vāyustvaṁ sūryastvaṁ candramāstvaṁ brahma bhūrbhuvaḥ svarom ।। 6।।

गुणादिं पूर्वमुच्चार्य वर्णादीं स्तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण ऋद्धम्। एतत्तव मनुस्वरूपम्।

guṇādiṁ pūrvamuccārya varṇādīṁ stadanantaram । anusvāraḥ parataraḥ । ardhendulasitam । tāreṇa ṛddham । etattava manusvarūpam ।

गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। सगुंहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्रीच्छन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः॥ ७॥

gakāraḥ pūrvarūpam । akāro madhyamarūpam । anusvāraścāntyarūpam । binduruttararūpam । nādaḥ sandhānam । sagṁ hitā sandhiḥ । saiṣā gaṇeśavidyā । gaṇaka ṛṣiḥ । nicṛdgāyatrīcchandaḥ । gaṇapatirdevatā । om gaṁ gaṇapataye namaḥ ।। 7 ।।

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ ८ ॥

ekadantāya vidmahe vakratuṇḍāya dhīmahi | tanno dantiḥ pracodayāt || 8 ||

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥

रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥

भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः

पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥

ekadantaṁ caturhastaṁ pāśamaṅkuśadhāriṇam | radaṁ ca varadaṁ hastairbibhrāṇaṁ mūṣakadhvajam || raktaṁ lambodaraṁ śūrpakarṇakaṁ raktavāsasam | raktagandhānuliptāṅgaṁ raktapuṣpaiḥ supūjitam || bhaktānukampinaṁ devaṁ jagatkāraṇamacyutam | āvirbhūtaṁ ca sṛṣṭyādau prakṛteḥ puruṣātparam || evaṁ dhyāyati yo nityaṁ sa yogī yooginām varaḥ || 9 ||

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥

रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥

भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः

पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥

ekadantaṁ caturhastaṁ pāśamaṅkuśadhāriṇam | radaṁ ca varadaṁ hastairbibhrāṇaṁ mūṣakadhvajam || raktaṁ lambodaraṁ śūrpakarṇakaṁ raktavāsasam | raktagandhānuliptāṅgaṁ raktapuṣpaiḥ supūjitam || bhaktānukampinaṁ devaṁ jagatkāraṇamacyutam | āvirbhūtaṁ ca sṛṣṭyādau prakṛteḥ puruṣātparam || evaṁ dhyāyati yo nityaṁ sa yogī yooginām varaḥ || 9 ||

**नमो व्रातपतये । नमो गणपतये । नमः प्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ॥ १० ॥**

namo vrātapataye | namo gaṇapataye | namaḥ pramathapataye | namaste'stu lambodarāyaikadantāya vighnanāśine śivasutāya varadamūrtaye namaḥ || 10 ||